॥ महा न्यासम् ॥

ॐ नमः शिवाय ॥

महा न्यासः पञ्च-पाठ प्राणम्भः ॥

शिवाय नमः । ॐ ॥

गणानां त्वा गणपति ग्ं हवामहे कविं कवीनाम्-उपम-श्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्-पत आ नः शृण्व-न्नूतिभिः सीद सादनम् ॥

ॐ महा-गणपतये नमः ॥

॥ पञ्चाङ्ग-रुद्र न्यासः ॥

अथ पञ्चाङ्ग-रुद्राणां न्यास-पूर्वकं जप-होमार्चना-भिषेक-विधिं व्याख्यास्यामः ॥

ओंकार मन्त्र संयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं तस्मै ओंकाराय नमो नमः ॥

नमस्ते देवदेवेश नमस्ते परमेश्वर।

नमस्ते वृषभा-रूढ नकाराय नमो नमः॥

ॐ नमो भगवते रुद्राय॥

ॐ भूर् भुव स्सुवः। ॐ नं।

नमस्ते रुद्र मन्यव उतोत इषवे नमः।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥

या त इषुः शिवतमा शिवम् बभूव ते धनुः।

शिवा शरव्या या तव तया नो रुद्र मृडय॥

कं खं गं घं ङं। य र ल व श ष स हों।

ॐ नमो भगवते रुद्राय। नं ॐ। पूर्वाङ्ग रुद्राय नमः॥

महादेवं महात्मानं महा पातक नाशनम्।

महा पाप हरं वन्दे मकाराय नमो नमः॥

ॐ भूर् भुव स्सुवः। ॐ मं।

अपैतु मृत्यु-रमृतन्न आगन्-वैवस्वतो नो अभयं कृणोतु।
पर्णं वनस्पतेर्-इवाभिन-श्शीयतां रयिस्स चतान्नाः शचीपतिः॥

चं छं जं झं ञं। य र ल व श ष स हों।
ॐ नमो भगवते रुद्राय। मं ॐ। दक्षिणाङ्ग रुद्राय नमः॥

शिवं शान्तं जगन्नाथं लोकानु-ग्रह कारणम्।
शिवमेकं परं वन्दे शिकाराय नमो नमः॥

ॐ भूर् भुव स्सुवः। ॐ शिं।
निधन-पतये नमः। निधन-पतान्तिकाय नमः।
ऊर्ध्वाय नमः। ऊर्ध्व-लिङ्गाय नमः।
हिरण्याय नमः। हिरण्य-लिङ्गाय नमः
सुवर्णाय नमः। सुवर्ण-लिङ्गाय नमः।
दिव्याय नमः। दिव्य-लिङ्गायनमः।
भवाय नमः। भव-लिङ्गाय नमः।
शर्वाय नमः। शर्व-लिङ्गाय नमः।
शिवाय नमः। शिव-लिङ्गाय नमः।
ज्वलाय नमः। ज्वल-लिङ्गाय नमः।

आत्माय नमः। आत्म-लिङ्गाय नमः।

परमाय नमः। परम-लिङ्गाय ॐ नमः।

एतत् सोमस्य सूर्यस्य। सर्व-लिङ्गग्ं।

स्थापयति। पाणि-मन्त्रं पवित्रम्॥

टं ठं डं ढं णं। य र ल व श ष स हों।

ॐ नमो भगवते रुद्राय। शिं ॐ। पश्चिमाङ्ग रुद्राय नमः॥

वाहनं वृषभो यस्य वासुकिः कण्ठ भूषणम्।

वामे शक्तिधरं वन्दे वाकाराय नमो नमः॥

ॐ भूर् भुव स्सुवः। ॐ वां।

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥

तं थं दं धं नं। य र ल व श ष स हों।

ॐ नमो भगवते रुद्राय। वां ॐ। उत्तराङ्ग रुद्राय नमः॥

यत्र कुत्र स्थितं देवं सर्व व्यापिनमीश्वरम्।

यल्लिङ्गं पूजये-न्नित्यं यकाराय नमो नमः ॥

ॐ भूर् भुव स्सुवः। ॐ यं।
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः।
तेना-न्नेनाप्यायस्व ॥
नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

पं फम् बं भं मं। य र ल व श ष स हों।
ॐ नमो भगवते रुद्राय। यं ॐ। ऊर्ध्वाङ्ग रुद्राय नमः ॥

॥ पञ्चाङ्ग मुख ध्यानम् ॥

अथ पञ्चाङ्ग मुख न्यासः ॥

नमः शिवाय ॥

ॐ नं। तत्-पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात् ॥

संवर्ताग्नि तटित्-प्रदीप्त कनक प्रस्पर्धि तेजोमयं
गंभीर-ध्वनि सामवेद जनकं ताम्राधरं सुंदरम्।
अर्धे-दुद्युति लोलपिंगळ जटाभार प्रबद्धोरगं
वन्दे सिद्ध सुरासुरेन्द्र नमितं पूर्वं मुखं शूलिनः॥

ॐ नमो भगवते रुद्राय। नं ॐ। पूर्व मुखाय नमः॥

ॐ मं। अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभः।
सर्वेभ्यस्-सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥

कालाभ्र भ्रमरां-जनद्युति निभं व्यावृत्त पिङ्गेक्षणं
कर्णोद्-भासित भोगिमस्तक मणिप्रोद्दीर्ण दंष्ट्रांकुरम्।
सर्प प्रोत कपाल शुक्ति शकल व्याकीर्ण-सच्छेखरं
वन्दे दक्षिण-मीश्वर स्यकुटिल भ्रूभंग रौद्रं मुखम्॥

ॐ नमो भगवते रुद्राय। मं ॐ। दक्षिण मुखाय नमः॥

ॐ शिं। सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः। भवे भवे नाति भवे
भवस्वमां। भवोद्भवाय नमः॥

प्रालेय-चलमिन्दु कुंद धवळं गोक्षीर फेन प्रभं
भस्माभ्यक्त मनंग देह दहन ज्वालावली लोचनम्।
ब्रह्मन्दादि मरुद्गणै स्त्सुतिपदै रभ्यर्चितं योगिभिः
वंदेहं सकलं कळंक रहितं स्थाणोर्मुखं पश्चिमम्॥

ॐ नमो भगवते रुद्राय। शिं ॐ। पिश्चिम मुखाय नमः॥

ॐ वां। वामदेवाय नमो ज्येष्ठाय नमश्-श्रेष्ठाय नमो रुद्राय नमः। कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्।
सर्वभूतदमनय नमो मनोन्मनाय नमः॥

गौरं कुंकुम पंकिलं सुतिलकं व्यापाण्डु गण्डस्थलं
भ्रूविक्षेप कटाक्ष वीक्षण लसत्-संसक्त कर्णोत्-फलम्।
स्निग्धं बिब फलाधरं प्रहसितं नीलालका-लंकृतं
वन्दे पूर्ण शशाङ्क-मण्डल-निभं वक्त्रं हर-स्योत्तरम्॥

ॐ नमो भगवते रुद्राय। वां ॐ। उत्तर मुखाय नमः॥

ॐ यं। ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम्।
ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम्॥

॥ गुह्यादि मस्तकान्तं षडङ्ग न्यासः॥

व्यक्ताव्यक्त गुणेतरं परतरं षट्त्रिंश तत्वात्मकं
तस्मा-दुत्तम तत्त्व-मक्षर-मिदं ध्येयं सदा योगिभिः।
ओंकारादि समस्त मन्त्र जनकं सूक्ष्माति सूक्ष्मं परं
शान्तं पञ्चम-मीश्वरस्य वदनं खंव्यापि तेजोमयम्॥

ॐ नमो भगवते रुद्राय। यं ॐ ऊध्व मुखाय नमः॥

पूर्वे पशुपतिः पातु दक्षिणे पातु शङ्करः।
पश्चिमे पातु विश्वेशो नीलकण्ठ-स्तथोत्तरे॥

ईशान्यां पातु मां शर्वो ह्याग्नेय्यं पार्वती पतिः।
नैरृत्यां पातुमे-रुद्रो वायव्यां नीललोहितः॥

ऊर्ध्वे त्रिलोचनः पातु अधरायां महेश्वरः।
एताभ्यो दश दिग्भ्यस्तु सर्वतः पातु शङ्करः॥

॥ प्रथमो न्यासः ॥

अथ प्रथमो न्यासः ॥

शिवाय नमः ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तनुवा शन्तमया गिरिशन्ता-भिचाकशीहि ॥

शिखयै नमः ॥ (tuft - top of head)

अस्मिन् महत्यर्णवेऽन्तरिक्शे भवा अधि ।

तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

शिरसे नमः ॥ (head)

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

ललाटाय नमः ॥ (forehead)

हग्ंस श्शुचिष-द्वसुरन्तरिक्ष-सद्धोत वेदिष-दतिथिर्-दुरोणसत् ।

नृषद्वर-सदृत-सद्व्योम-सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

भ्रुवोर्-मध्याय नमः ॥ (third eye)

त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम्।
उर्वारुकमिव बन्धनान्-मृत्यो-र्-मुक्षीय माऽमृतात्॥
नेत्राभ्यां नमः॥ (eyes)

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च। नमः सूद्याय च
सरस्याय च नमो नाद्याय च वैशन्ताय च॥
कर्णाभ्यां नमः॥ (two ears)

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते॥
नासिकायै नमः॥ (nose)

अवतत्य धनुस्त्वगं सहस्राक्श शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥
मुखाय नमः॥ (face)

(परिणो रुद्रस्य हेतिर्-वृणक्तु परि त्वेषस्य दुर्मतिर-घायोः -।
अव स्थिरा मघवद्-भ्यस्तनुष्व मीढ्व-स्तोकाय तनयाय मृडय॥
मणि-बन्धाभ्यां नमः [wrist])

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।
तेषागं सहस्र-योजनेऽवधन्वानि तन्मसि॥

हस्ताभ्यां नमः ॥ (palm)

सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः । भवे भवे नाति भवे भवस्वमां ।
भवोद्भवाय नमः ॥

अङ्गुष्ठाभ्यां नमः ॥ (thumb)

वामदेवाय नमो ज्येष्ठाय नमश्-श्रेष्ठाय नमो रुद्राय नमः । कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस् ।
सर्वभूतदमनय नमो मनोन्मनाय नमः ॥

तर्जनीभ्यां नमः ॥ (index finger)

अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभः ।
सर्वेभ्यस्-सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

मध्यमाभ्यां नमः ॥ (middle finger)

तत्-पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

अनामिकाभ्यां नमः ॥ (ring finger)

ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम् ।
ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम् ॥

कनिष्ठिकाभ्यां नमः ॥ (little finger)

(नमो हिरण्य-बाहवे हिरण्य-वर्णाय हिरण्य-रूपाय हिरण्य-पतयेऽम्बिका-पतय
उमा-पतये पशुपतये नमो नमः ॥
करतल-कर-पृष्ठाभ्यां नमः ॥ [front and back of hands])

नमो वः किरिकेभ्यो देवानागं हृदयेभ्यो नमो विक्शी-णकेभ्यो नमो विचिन्-
वत्केभ्यो नम आनिर्-हतेभ्यो नम आमी-वत्केभ्यः ॥
हृदयाय नमः (heart)

(ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः - ।
तेषागं सहस्र-योजनेऽवधन्वानि तन्मसि ॥
उदराय नमः ॥ [belly])

(नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः
प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च
नमः सिकत्याय च प्रवाह्याय च ॥
वक्षाभ्यां नमः ॥ [breast, chest)

नमो गणेभ्यो गणपति-भ्यश्च वो नमो नमो विरूपेभ्यो विश्वरुपे-भ्यश्च वो नमः ॥
पृष्ठाय नमः ॥ (back)

नमस्तक्शभ्यो रथकारे-भ्यश्च वो नमो नमः कुलालेभ्यः कमारेभ्यश्च वो नमो नमः ॥

कक्षाभ्यां नमः ॥ (arm pit)

नमो हिरण्य-बाहवे सेनान्ये दिशां च पतये नमो नमो वृक्शेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः ॥

पार्श्वाभ्यां नमः ॥ (sides, ribs)

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग् उत ।
अनेश-न्नस्येषव आभुरस्य निषङ्गथिः ॥

जठराय नमः ॥ (stomach)

हिरण्यगर्भः समवर्त-ताग्रे भूतस्य जातः पतिर् एक आसीत् - ।
स दाधार पृथ्इवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

नाभ्यै नमः ॥ (navel)

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्श आयुध-न्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदा-गहि ॥

कठ्यै नमः ॥ (hip)

ये भूताना-मधिपतयो विशिखासः कपर्दिनः ।
तेषाग् सहस्र-योजनेऽवधन्वानि तन्मसि ॥

गुह्याय नमः । (private parts)

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाꣳ सहस्र-योजनेऽवधन्वानि तन्मसि ॥

अण्डाभ्यां नमः ॥ (testicles, ovaries)

स शिरा जातवेदाः अक्षरं परमं पदम् ।
वेदानाꣳ शिरसि माता-युष्मन्तं करोतु माम् ॥

अपानाय नमः ॥ (anus)

मा नो महान्त-मुत मा नो अर्भकं मा न उक्शन्त-मुत मा न उक्शितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

ऊरुभ्यां नमः ॥ (thighs)

एष ते रुद्र भाग-स्तञ्जुषस्व तेना-वसेन ।
परो मूजवतोऽतीह्यव-ततधन्वा पिनाक-हस्तः कृत्तिवासाः - ॥

जानुभ्यां नमः ॥ (knees)

सꣳसृष्टजित् सोमपा बाहुशर्-ध्यूर्ध्वधन्वा प्रतिहिता-भिरस्ता ।
बृहस्पते परि दीयारथेन रक्षोहाऽमित्राꣳ अप-बाधमानः ॥

जङ्घाभ्यां नमः ॥ (ankle)

वैश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥

गुल्फाभ्यां नमः ॥ (calf)

ये पथां पथि-रक्शय ऐलबृदा यव्युधः।
तेषागं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

पादाभ्यां नमः ॥ (feet)

अध्यवो-चदधि-वक्ता प्रथमो दैव्यो भिषक्।
अहीग्ग्श्च सर्वाञ्-जम्भयन्त्-सर्वाश्च यातुधान्यः ॥

कवचाय हुं ॥ (cross hands to touch opposite shoulders)

नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥

उप-कवचाय हुं ॥ (cross hands on the back)

नमो अस्तु नीलग्री-वाय सहस्रा-क्शाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ॥

तृतीय नेत्र-त्रयाय वौषट् ॥ (index, middle, and ring finger to three eyes)

प्रमुञ्च धन्वन-स्त्व-मुभयो-रार्त्नियोर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप ॥

अस्त्राय फट् ॥ (clap left palm with right index and middle finger)

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे ।
तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥
इति दिग्-बन्धः ॥ (circle head clockwise with right hand and snap four times)

अथ मूर्धेति पादादं दशाङ्ग न्यासो द्वितीयः ॥

ॐ नमो भगवते रुद्राय ॥

ॐ मूर्ध्ने नमः (top of head) । नं नासिकायै नमः (nose) ।
मों ललाटाय नमः (forehead) । भं मुखाय नमः (face) ।
गं कण्थाय नमः (neck) । वं हृदयाय नमः (heart) ।
तें दक्षिण-हस्ताय नमः (left hand) । रुं वाम-हस्ताय नमः (right hand) ।
द्रां नाभ्यै नमः (navel) । यं पादाभ्यां नमः (feet) ॥

अथ पादाति मूर्धांतं पञ्चाङ्ग न्यास-स्तितीयः ।

शिवाय नमः ॥

सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः । भवे भवे नाति भवे भवस्वमां ।
भवोद्भवाय नमः ॥

पादाभ्यां नमः ॥ (feet)

वामदेवाय नमो ज्येष्ठाय नमश्-श्रेष्ठाय नमो रुद्राय नमः। कालाय नमः

कलविकरणाय नमो बलविकरणाय नमो बलाय नमो  बलप्रमथनाय नमस्।

सर्वभूतदमनय नमो मनोन्मनाय नमः ॥

ऊरु मध्याभ्यां नमः ॥ (middle thigh)

अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभः।

सर्वेभ्यस्-सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

हृदयाय नमः ॥ (heart)

तत्-पुरुषाय विद्महे महादेवाय धीमहि।

तन्नो रुद्रः प्रचोदयात् ॥

मुखाय नमः ॥ (face)

ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम्।

ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम् ॥

हंस हंस मूर्ध्ने नमः ॥ (forhead)

अस्य श्री हंस-गायत्री स्तोत्र महामन्त्रस्य। अव्यक्त परब्रह्म ऋषिः। अव्यक्त

गायत्री छन्दः। परमहंसो देवता। हं सं बीजम्। हं सीं शक्तिः। हं सूं कीलकम्।

परमहंस प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

हं सां अङ्गु-ष्ठाभ्यां नमः। हं सीं तर्जनी-भ्यां नमः।
हं सूं मध्य-माभ्यां नमः। हं सैं अनामिका-भ्यां नमः।
हं सौं कनिष्ठि-काभ्यां नमः। हं सः करतल-कर-पृष्ठाभ्यां नमः।

हं सां हृदयाय नमः। हं सीं शिरसे स्वाहा।
हं सूं शिखायै वषट्। हं सैं कवचाय हुं।
हं सौं नेत्र-त्रयाय वौषट्। हं सः अस्त्राय फट्॥
भूर्-भुवस्सुवरों इति दिग्बन्धः॥

ध्यानम्॥

गमा-गमस्थं गमना-दिशून्यं चिद्रू-पदीपं तिमिरा-पहारम्।
पश्यामि ते सर्व जनान्त-रस्थं नमामि हंसं परमात्मरूपम्॥

देहो देवालयः प्रोक्तो जीवो देवः सनातनः।
त्यजेद-ज्ञान-निर्माल्यं सोऽहम्-भावेन पूजयेत्॥

हंस हंसः परम हंस। हंस स्सोअऽहं सोऽहं हं सः॥

॥ हंस गायत्री ॥

हंस हंसाय विद्महे परमहंसाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥ (repeat 3 times)

हंस हंसेति योब्रूया-द्धंसो नाम सदा-शिवः ।
एवं न्यास-विधिं कृत्वा तत-स्संपुट-मारभेत् ॥

॥ दिक्सम्पुट न्यासः ॥

अथ दिक्सम्पुट न्यासः ॥

ॐ भूर्भुव स्सुवरोम् ।
नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
ॐ लं ।
त्रातार-मिन्द्र मवितार-मिन्द्रग्ं हवे हवे सुहवग्ं शूर-मिन्द्रम् ।
हुवे नु शक्रं पुरु-हूतं इन्द्रग्ग् स्वस्ति नो मघवा धात्विन्द्रः ॥
ॐ लं । ॐ भूर्भुव स्सुवः ।
पूर्व-दिग्भागे इन्द्राय वज्र-हस्ताय देवा-धिपतये । ऐरावत-वाहनाय सङ्गाय सायुधाय सशक्तये स परिवारय । सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः ।

ॐ लं इन्द्राय नमः ॥

पूर्व-दिग्भागे ललाटा-स्थाने इन्द्राय नमः। इन्द्रः सुप्रीतो वरदो भवतु।
इन्द्रः सं रक्षन्तु ॥

ॐ भूर्भुव स्सुवरोम्।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥

नं रं।

त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासि-सीष्ठाः -।
यजिष्ठो वह्नितम श्शोशु-चानो विश्वा द्वेषांसि प्रमुमुग्-ध्यस्मत् ॥

नं रं। ॐ भूर्भुव स्सुवः।

आग्नेय-दिग्भागे अग्नये शक्ति-हस्ताय तेजोऽधिपतये। अज-वाहनाय सङ्गाय
सायुधाय सशक्तये स परिवारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय
नमः।

ॐ रं अग्नये नमः ॥

आग्नेय-दिग्भागे नेत्र-स्थाने अग्नये नमः। अग्निः सुप्रीतो वरदो भवतु।
अग्निः सं रक्षन्तु ॥

ॐ भूर्भुव स्सुवरोम्।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

मों हं ।

सुगन्नः पन्था-मभयं कृणोतु । यस्मि-न्नक्शत्रे यम एति राजा । यस्मि-न्नेन मभ्य-षिञ्चन्त देवाः - । तदस्य चित्रग्ं हविषा यजाम ॥

मों हं । ॐ भूर्भुव स्सुवः ।

दक्षिण-दिग्भागे यमाय दण्ड-हस्ताय धर्मा-धिपतये । महिष-वाहनाय सङ्गाय सायुधाय सशक्तये स परिवारय । सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः ।

ॐ हं यमाय नमः ॥

दक्षिण-दिग्भागे कर्ण-स्थाने यमाय नमः । यमः सुप्रीतो वरदो भवतु । यमः सं रक्षन्तु ॥

ॐ भूर्भुव स्सुवरोम् ।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

भं षं ।

असुन्वन्त मयज-मानमिच्च-स्तेन-स्येत्यान्त-स्कर-स्यान्वेषि । अन्यमस्म-दिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥

भं षं। ॐ भूर्भुव स्सुवः।

नैर्ऋत-दिग्भागे निर्ऋतये खड्ग-हस्ताय रक्षोऽधिपतये। नर-वाहनाय सङ्गाय सायुधाय सशक्तये स परिवारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः।

ॐ षं निर्ऋतये नमः॥

नैर्ऋत-दिग्भागे मुख-स्थाने निर्ऋतये नमः। निर्ऋतिः सुप्रीतो वरदो भवतु। निर्ऋतिः सं रक्षन्तु॥

ॐ भूर्भुव स्सुवरोम्।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

गं वं।

तत्वा यामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुनेह-बोध्युरु सग्ंस मा न आयुः प्रमोषीः -॥। गं वं। ॐ भूर्भुव स्सुवः।

पश्चिम-दिग्भागे वरुणाय पाश-हस्ताय जलाधिपतये। मकर-वाहनाय सङ्गाय सायुधाय सशक्तये स परि-वारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः।

ॐ वं वरुणाय नमः॥

पश्चिम-दिग्भागे बाहु-स्थाने वरुणाय नमः। वरुणः सुप्रीतो वरदो भवतु।
वरुणः सं रक्षन्तु॥

ॐ भूर्भुव स्सुवरोम्।
नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च॥
वं यं।
आ नो नियुद्भि श्शतिनि-भिरध्वरम्। सह-स्त्रिणीभि रुपयाहि यज्ञम्।
वायो अस्मिन्. हविषि मादयस्व। यूयं पात स्वस्तिभि स्सदा नः॥
वं यं। ॐ भूर्भुव स्सुवः।
वायव्य-दिग्भागे वायवे साङ्कुश-ध्वज-हस्ताय प्राणाधिपतये। मृग-वाहनाय
सङ्गाय सायुधाय सशक्तये स परि-वारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-
पार्षदाय नमः।
ॐ यं वायवे नमः॥
वायव्य-दिग्भागे नासिका-स्थाने वायवे नमः। वायुः सुप्रीतो वरदो भवतु।
वायुः सं रक्षन्तु।

ॐ भूर्भुव स्सुवरोम्।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

तें सं ।

वयगं सोमं व्रते तव । मनस्त-नूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

तें सं । ॐ भूर्भुव स्सुवः ।

उत्तर-दिग्भागे सोमाय अमृत-कलश-हस्ताय नक्षत्रा-धिपतये । अश्व-वाहनाय सङ्गाय सायुधाय सशक्तये स परि-वारय । सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः ।

ॐ सं सोमाय नमः ॥

उत्तर-दिग्भागे हृदय-स्थाने सोमाय नमः । सोमः सुप्रीतो वरदो भवतु । सोमः सं रक्षन्तु ।

ॐ भूर्भुव स्सुवरोम् ।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

रुं शं ।

तमीशानं जगत स्तस्थु-षस्पतिम् । धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेद-सामस-द्वृधे । रक्शिता पायु रदब्ध स्स्वस्तये ॥

रुं शं । ॐ भूर्भुव स्सुवः ।

ईशान्य-दिग्भागे ईशानाय त्रिशूल-हस्ताय भूता-धिपतये। वृषभ-वाहनाय सङ्गाय सायुधाय सशक्तये स परि-वारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः।

ॐ शं ईशानाय नमः॥

ईशान्य-दिग्भागे नाभि-स्थाने ईशानाय नमः। ईशानः सुप्रीतो वरदो भवतु।
ईशानः सं रक्षन्तु।

ॐ भूर्भुव स्सुवरोम्।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

द्रां खं।

अस्मे रुद्रा मेहना पर्वतासो वृत्र-हत्ये भर हूतौ सजोषाः।
यश्शंसते स्तुवते धायि पज्र इन्द्र-ज्येष्ठा अस्मागं अवन्तु देवाः -॥

द्रां खं। ॐ भूर्भुव स्सुवः।

ऊर्ध्व-दिग्भागे ब्रह्मणे पद्म-हस्ताय प्रजा-धिपतये। हंस-वाहनाय सङ्गाय सायुधाय सशक्तये स परि-वारय। सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः।

ॐ खं ब्रह्मणे नमः॥

ऊर्ध्व-दिग्भागे मूर्ध-स्थाने ब्रह्मणे नमः। ब्रह्मः सुप्रीतो वरदो भवतु।
ब्रह्मः सं रक्षन्तु।

ॐ भूर्भुव स्सुवरोम् ।

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

यं ह्रीं ।

स्योना पृथिवी भवा-नृक्शरा निवेशनी ।

यच्छा-नश्शर्म सप्रथाः ॥

यं ह्रीं । ॐ भूर्भुव स्सुवः ।

अधो-दिग्भागे विष्णवे चक्र-हस्ताय लोका-धिपतये । गरुड-वाहनाय सङ्गाय सायुधाय सशक्तये स परि-वारय । सर्वालङ्कार-भूषिताय उमा-महेश्वर-पार्षदाय नमः ।

ॐ ह्रीं विष्णवे नमः ॥

अधो-दिग्भागे पाद-स्थाने विष्णवे नमः । विष्णुः सुप्रीतो वरदो भवतु । विष्णुः सं रक्षन्तु ।

आदौ प्रणवमुच्चार्य व्याहृतिः प्रणवं ततः ।

बीजं मन्त्रं समुच्चार्य मन्त्रांते बीज-मुच्चरेत् ॥

(प्रणवं व्याहृतिर्-बीजं शंभवे अ ततः परम् ।

दिङ्मन्त्रं शम्भवे चान्तं बीजं प्रणवमुच्चरेत् ॥ )

## ॥ रौद्री-करणम् ॥

अथ रौद्री-करणम् ॥

ॐ भूर्भुव स्सुवः । ॐ अं ॥
नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
विभूरसि प्रवाहणो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः - ॥
अं ॐ । भूर्-भुवसुवरोम् । शिखायै नमः ॥ (crown of head)

ॐ भूर्भुव स्सुवः । ॐ आं ॥
नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
वह्निरसि हव्य-वाहणो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः - ॥
आं ॐ । भूर्-भुवसुवरोम् । शिरसे नमः ॥ (head)

ॐ भूर्भुव स्सुवः । ॐ इं ॥
नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
श्वात्रोऽसि प्रचेताः रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः - ॥

इं ॐ । भूर्-भुवसुवरोम् । मूर्ध्ने नमः ॥ (forehead)

ॐ भूर्भुव स्सुवः । ॐ ईं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

तुथोऽसि विश्ववेद् रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः - ॥

ईं ॐ । भूर्-भुवसुवरोम् । ललाटाय नमः ॥ (brow of head)

ॐ भूर्भुव स्सुवः । ॐ उं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

उशिगअसि कवी रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः - ॥

उं ॐ । भूर्-भुवसुवरोम् । नेत्राभ्यां नमः ॥ (eyes)

ॐ भूर्भुव स्सुवः । ॐ ऊं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

अङ्घारिरसि बंभारी रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः - ॥

ऊं ॐ । भूर्-भुवसुवरोम् । कर्णाभ्यां नमः ॥ (ears)

ॐ भूर्भुव स्सुवः। ॐ ॠं॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

अवस्युरसि दुवस्वान् सि रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः -॥

ॠं ॐ। भूर्-भुवसुवरोम्। मुखाय नमः॥ (face)

ॐ भूर्भुव स्सुवः। ॐ ॠं॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

शुंध्यूरसि प्र मार्जालीयो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः -॥

ॠं ॐ। भूर्-भुवसुवरोम्। कण्ट्ःआय नमः॥ (neck)

ॐ भूर्भुव स्सुवः। ॐ ऌं॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

संम्राडसि कृशानू रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंसीः -॥

ऌं ॐ। भूर्-भुवसुवरोम्। बाहुभ्यां नमः॥ (shoulders)

ॐ भूर्भुव स्सुवः। ॐ ॡं॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥

परिषद्योसि पवमानो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिꣳ सीः - ॥

लृं ॐ । भूर्-भुवसुवरोम् । दयाय नमः ॥ (heart)

ॐ भूर्भुव स्सुवः । ॐ एं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥

प्रतक्-वासि नभस्वान् रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिꣳ सीः - ॥

एं ॐ । भूर्-भुवसुवरोम् । नाभ्यै नमः ॥ (navel)

ॐ भूर्भुव स्सुवः । ॐ ऐं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥

असं मृष्टोऽसि हव्यसूदो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिꣳ सीः - ॥

ऐं ॐ । भूर्-भुवसुवरोम् । कठ्यै नमः ॥ (hips)

ॐ भूर्भुव स्सुवः । ॐ ओं ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥

ऋत-धामासि सुवर्ज्योती रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिꣳ सीः - ॥

ओं ॐ। भूर्-भुवसुवरोम्। ऊरुभ्यां नमः॥ (thighs)

ॐ भूर्भुव स्सुवः। ॐ औं॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

ब्रह्म ज्योतिरसि सुवर्धामा रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः -॥

औं ॐ। भूर्-भुवसुवरोम्। जानुभ्यां नमः॥ (knees)

ॐ भूर्भुव स्सुवः। ॐ अँ॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

अजोस्येक पाद्-रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः -॥

अँ ॐ। भूर्-भुवसुवरोम्। जङ्घाभ्यां नमः॥ (ankles)

ॐ भूर्भुव स्सुवः। ॐ अः॥

नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

अहिरसि बुध्नियो प्रवाहणो रौद्रेणा-नीकेन पाहि माग्ने पिपृहि मा मामा हिंग्ं सीः -॥

अः ॐ। भूर्-भुवसुवरोम्। पादाभ्यां नमः॥ (feet)

त्वगस्थि-गतैः सर्व-पापैः प्रमुच्यते । सर्व-भूतेष्व पराजितो भवति ।
ततो भूत प्रेत पिशाच- ब्रह्म-राक्षस यक्ष-यमदुत-शाकिनी-डाकिनी सर्प श्वापद
वृश्चिक तस्कर ज्वरा द्युपद्रव जोप-घाताः । सर्वे ज्वलन्तं पश्यन्तु । मां रक्षन्तु ।
यजमानं सहकुटुम्बं रक्षन्तु । सर्वान् जनान् रक्षन्तु ॥

॥ गुह्यादि मस्तकान्तं षडङ्ग न्यास-श्चतुर्थः ॥

अथ गुह्यादि मस्तकान्तं षडङ्ग न्यास-श्चतुर्थः ॥

शिवाय नमः ॥

मनो ज्योतिर्-जुषता-माज्यं विच्छिन्नं यज्ञं समिमं दधातु ।
या इष्टा उषसो निम्रुचश्च ताः सं दधामि हविषा घृतेन ॥
गुह्याय नमः ॥ (private parts)

अबोद्ध्यग्निः समिधा जनानां प्रति धेनुम-वायती मुषासम् ।
यह्वा इव प्रवयामु-ज्जिहानाः प्रभानवः सिस्रतो नाकमच्छ ॥
नाभ्यै नमः ॥ (navel)

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपागं रेतागंसि जिन्वति ॥ हृदयाय नमः ॥ (heart)

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर्-अमृताय जातमग्निम् ।
कविग्ं सम्राज मतिथिं जनानामा-सन्ना पात्रं जनयन्त देवाः - ॥
कण्ठाय नमः ॥ (neck)

मर्माणि ते वर्मभिश्छ-दयामि सोमस्त्वा राजाऽमृतेना-भिवस्ताम् ।
उरोर्व-रीयो वरिवस्ते अस्तु जयन्तं त्वा मनुमदन्तु देवाः - ॥
मुखाय नमः ॥ (face)

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि ।
शम्-प्रजाभ्यो यजमानाय लोकं । ऊर्जं पुष्टिं दददभ्या-ववृत्स्व । शिरसे नमः ॥
(forehead)

॥ आत्मरक्षा ॥

अथ ब्रह्मात्मन् इत्यनुवाकः ॥

ब्रह्मात्मन्-वद्-सृजत । तद्-कामयत । समात्मना पद्येयेति । आत्म-न्नात्म-
न्नित्या-मन्त्रयत । तस्मै दशमग्ं हूतः प्रत्यशृणोत् - । स दशहूतोऽभवत् ।
दशहूतो हवै नामैषः । तं वा एतं दशा-हूतग्ं सन्तं । दशा-होते-त्याचक्षते
परोक्षेण । परोक्ष-प्रिया इव हि देवाः - ॥

आत्म-न्नात्म-न्नित्या-मन्त्रयत। तस्मै सप्तमग्ं हूतः प्रत्यशृणोत् -। स सप्तहूतोऽभवत्. । सप्तहूतो हवै नामैषः। तं वा एतं सप्त-हूतग्ं सन्तं। सप्त-होते-त्याचक्षते परोक्षेण। परोक्ष-प्रिया इव हि देवाः -॥

आत्म-न्नात्म-न्नित्या-मन्त्रयत। तस्मै षष्ठग्ं हूतः प्रत्यशृणोत् -। स षड्ढूतोऽभवत्. । षड्ढ्हूतो हवै नामैषः। तं वा एतग्ं षड्ढूतग्ं सन्तं। षड्ढ्होते-त्याचक्षते परोक्षेण। परोक्ष-प्रिया इव हि देवाः -॥

आत्म-न्नात्म-न्नित्या-मन्त्रयत। तस्मै पञ्चमग्ं हूतः प्रत्यशृणोत् -। स पञ्चहूतोऽभवत्. । पञ्चहूतो हवै नामैषः। तं वा एतं पञ्च-हूतग्ं सन्तं। पञ्च-होते-त्याचक्षते परोक्षेण। परोक्ष-प्रिया इव हि देवाः -॥

आत्म-न्नात्म-न्नित्या-मन्त्रयत। तस्मै चतुर्थग्ं हूतः प्रत्यशृणोत् -। स चतुर्हूतोऽभवत्. । चतुर्हूतो हवै नामैषः। तं वा एतं चतु-र्हूतग्ं सन्तं। चतुर्-होते-त्याचक्षते परोक्षेण। परोक्ष-प्रिया इव हि देवाः -॥

तम-ब्रवीत् -। त्वं वै मे नेदिष्ठग्ं हूतः प्रत्यश्रौषीः -। त्वयै नानाख्यातार इति। तस्मा-न्नुहैनाग्ं-श्चतुर्-होतार इत्या-चक्षते। तस्माच्छुश्रूषुः पुत्राणाग्ं हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद।

आत्मने नमः ॥

॥ शिव-सङ्कल्पः ॥

अथ हृदया-द्यस्त्रङ्दं पञ्चाङ्ग न्यासः पञ्चमः ॥

शिवाय नमः ॥

येनेदं भूतं भुवनं भविष्यत् परि-गृहीतम्-आमृतेन सर्वम् ।
येन यज्ञस्त्रायते सप्तहोत तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति ।
यत्सम्मितं मनः संचरन्ति प्राणिन स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येन कर्माण्-यपसो मनीषिणो यज्ञे शृण्वन्ति विदथेषु धीराः ।
यद्-पूर्वं यत्क्षमन्तं प्रजानां तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यत्प्रज्ञान मुत चेतो धृतिश्च यज्जोति रत्न-रमृतं प्रजासु ।

यस्मान्न ईते किञ्चन कर्म क्रियते तन्मे मनः शिव-सङ्कल्पमस्तु ॥

सुषार-थिरश्वनि वयं मनुष्यान्मे नियुते पशुभित्-वाजिनीवान् ।
हृत्प्रविष्टं यदचरं यविष्ठं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यस्मि-न्नृचसामा-यजूंषि यस्मिन्-प्रतिष्ठा रशना-भाविभाराः ।
यस्मिग्ग्-श्चित्तं सर्व-मोतं प्रजानान् तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यदत्र षष्ठं त्रिशतं सुवीर्यं यज्ञस्य गुह्यं नव-नाव माय्यम् ।
दश पञ्च त्रिंशतं यत्परं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यज्जाग्रतो दूर-मुदैति सर्वं तत्सुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येनेदं विश्वं जगतो बभूव ये देववि-महतो जातवेदः - ।
तदेवाग्नि-स्तद्वाऽयुस्तत्-सूर्य-स्तदु चन्द्रमा स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिव-सङ्कल्पमस्तु ॥

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः ।
ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

अचिन्त्यं चा प्रमेयं च व्यक्ता-व्यक्त परं च यत् ।
सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

एका च दश शतं च सहस्त्रं चायुतं च ।
नियतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च  तन्मे मनः
शिव-सङ्कल्पमस्तु ॥

ये पञ्च पञ्चादश शतं सहस्त्र-मयुत-न्न्यर्बुदं च ।
ये अग्निचित्ते-ष्टकस्तां शरीरं  तन्मे मनः शिव-सङ्कल्पमस्तु ॥

वेदा-हमेतं पुरुषं महान्तं आदित्य-वर्णं तमसः परस्तात् ।
यस्य योनिन् परि-पश्यन्ति धीरा स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यस्यैतं धीरः पुनन्ति कवयो ब्रह्माण-मेतं त्वा वृणु-तमिन्दुम् ।
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

परात्-परतरं ब्रह्म तत्परात्-परतो हरिः।
यत्परात्-परतोऽधीशं तन्मे मनः शिव-सङ्कल्पमस्तु॥

परत्-परतरं चैव तत्परा चैव यत्परम्।
यत्परत्-परतो ज्ञेयं तन्मे मनः शिव-सङ्कल्पमस्तु॥

या वेदादिषु गायत्री सर्व-व्यापी महेश्वरी।
ऋग्यजुः सामाथर्वैश्च तन्मे मनः शिव-सङ्कल्पमस्तु॥

यो वै देवं महादेवं प्रायुतः प्रणवः शुचिः।
यः सर्वे सर्ववेदैश्च तन्मे मनः शिव-सङ्कल्पमस्तु॥

प्रयतः प्रणवों-कारं प्रणवं पुरुषोत्तमम्।
ॐकारं प्रणवात्मानं तन्मे मनः शिव-सङ्कल्पमस्तु॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यय-मीश्वरः।
अकायो निर्गुणो ह्यात्मा तन्मे मनः शिव-सङ्कल्पमस्तु॥

गो भिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टि-वर्धनम् ।
उर्वा-रुकमिव बन्धनान्-मृत्योर् मुक्षीय माऽमृतात् तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

कैलास-शिखरे रम्ये शन्करस्य शिवालये ।
देवतास्तत्र मोदन्ति तन्मे मनः शिव-सङ्कल्पमस्तु ॥

कैलास शिखरा वासं हिमवद्-गिरिगङ्ग्चया ।
नीलकण्ठं त्रिनेत्रें च तन्मे मनः शिव-सङ्कल्पमस्तु ॥

विश्वत-श्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् - ।
सम्बाहुभ्या-न्नमति सम्पत त्रैर्द्यावा-पृथिवी जनयन् देव एक स्तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

चतुरो वेदान धीयीत् सर्वशास्त्रमयं विदुः ।
इतिहास-पुराणानान् तन्मे मनः शिव-सङ्कल्पमस्तु ॥

मा नो महान्त-मुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्र रीरिष स्तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितोऽवधिर्-हविश्मन्तो नमसा विधेम ते तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नम स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै
रुद्राय नमो अस्तु तन्मे मनः शिव-सङ्कल्पमस्तु ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता-द्विसी-मतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनि-मसतश्च विव स्तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

यः प्राणतो निमिषतो महित्-वैक इद्राजा जगतो बभुव ।
य ईषे अस्य द्विपदश्-चतुष्पद कस्मै देवाय हविषा विधेम तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः - ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिव-
सङ्कल्पमस्तु ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना-विवेश तस्मै रुद्राय
नमो अस्तु तन्मे मनः शिव-सङ्कल्पमस्तु ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगं सर्व भुतानां तामि-होपह्वये श्रियं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

नमकं चमकं चैव पुरुष-सूक्तं च यद्वीदुः ।
महादेवं च तत्तुल्यं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

य इदगं शिव-सङ्कल्पगं सदा ध्यायन्ति ब्रह्मणाः - ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिव-सङ्कल्पमस्तु ॥

ॐ नमो भगवते रुद्राय॒य ।

शिव-सङ्कल्पगं

हृदयाय॒ नमः ॥

॥ पुरुष सूक्त पारायणम् ॥

अथ पूर्व-नारयण्-आख्यं पुरुष सू॒क्तम् ॥

शिवाय॒ नमः ॥

ॐ सहस्र-शीर्षा पुरुषः । सहस्राक्शः सहस्रपात् - । स भूमिं विश्वतो वृत्वा ।
अत्यतिष्ट-द्दशाङ्गुलम् । पुरुष एवेदगं सर्वम् । यद्भूतं यच्च भव्यम् । उताम्-ऋतत्व-
स्येषानः । यद-न्नेनाति-रोहति । एता-वानस्य महिमा । अतो ज्यायाग्ग्श्च पूरुषः ।
पादोऽस्य विश्वा भूतानि । त्रिपाद-स्यामृतं दिवि । त्रिपादूर्ध्व उदैत्-पुरुषः ।
पादोऽस्येहाऽऽभवात्पुनः । ततो विश्वङ्व्यक्रामत् । साशना-नशने अभि ।
तस्माद्विरा-ड्जायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश् चाद्-
भूमि-मथो पुरः । यत्-पुरुषेण हविषा । देवा यज्ञ-मतन्वत । वसन्तो अस्या-
सीदाज्यम् । ग्रीष्म इध्म श्शरद्धविः । सप्तास्यासन्-परिधयः । त्रिः सप्त समिधः

कृताः -। देवा यद्यज्ञं तन्वानाः -। अबध्नन्-पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्।
पुरुषं जातम-ग्रतः। तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्-
सर्वहुतः। संभृतं पृषदाज्यम्। पशूग्ग्स्ताग्ग्श्-चक्रे वायव्यान्। आरण्यान्-
ग्राम्याश्च ये। तस्माद्यज्ञात्-सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दांगंसि जज्ञिरे
तस्मात्। यजुस्तस्मा-दजायत। तस्मादश्वा अजायन्त। ये के चोभया-दतः।
गावो ह जज्ञिरे तस्मात्। तस्मा-ज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा
व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादा-वुच्येते। ब्राह्मणोऽस्य
मुखमासीत् -। बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः। पद्भ्यागं शूद्रो
अजायत। चन्द्रमा मनसो जातः। चक्शोः सूर्यो अजायत। मुखा-दिन्द्र-
श्चाग्निश्च। प्राणाद्-वायु-रजायत। नाभ्या आसी-दन्तरिक्शम्। शीर्ष्णो द्यौः
समवर्तत। पद्भ्यां भूमिर्-दिशः श्रोत्रात्। तथा लोकांग अकल्पयन्. । वेदा-हमेतं
पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः।
नामानि कृत्वाऽभिवदन्, यदास्ते। धाता पुरस्ता-द्यमुदा-जहार। शक्रः प्रविद्वान्-
प्रदिशश्-चतस्रः। तमेवं विद्वान्-अमृत इह भवति। नान्यः पन्था अयनाय
विद्यते। यज्ञेन यज्ञ-मयजन्त देवाः -। तानि धर्माणि प्रथमान्-यासन् -। ते ह
नाकं महि-मानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः -।

ॐ नमो नारायणाय॥ ॐ नमो भगवते रुद्राय॥

पुरुष सूक्तग्ग्

शिरसे स्वाहा॥

॥ उत्तरनारायणम् ॥

अथ उत्तर-नारायणो-ऽन्यनुवाकः ।

अद्भ्यः संभूतः पृतिव्यै रसाच्च । विश्व-कर्मणः समवर्-तताधि । तस्य त्वष्टा
विदध-द्रूपमेति । तत्-पुरुषस्य विश्व-माजान-मग्रे । वेदा-हमेतं पुरुषं महान्तम् ।
आदित्यवर्णं तमसः परस्तात् - । तमेवं विद्वान्-अमृत इह भवति । नान्यः पन्था
विद्यते-यऽनाय । प्रजापतिश्-चरति गर्भे अन्तः । अजा-यमनो बहुधा विजायते ।
तस्य धीराः परि-जानन्ति योनिम् । मरीचीनां पदम्-इच्छन्ति वेदसः ॥ यो देवेभ्य
आतपति । यो देवानां पुरो-हितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ।
रुचं ब्राह्मम् जनयन्तः । देवा अग्रे तदब्रुवन् - । यस्त्वैवं ब्राह्मणो विद्यात् - । तस्य
देवा असन् , वशे । ह्रीश्च ते लक्श्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् ।
अश्विनौ व्यात्तम् । इष्टम् मनिषाण । अमुं मनिषाण । सर्वम् मनिषण ।

ॐ नमो भगवते रुद्राय ।

उत्तर-नारायणं महा-नारायणग्ग्

शिखायै वषट् ॥

॥ अप्रतिरथम् (कवचम्) ॥

अथ अप्रतिरथानुवाकः ॥

आशुः शिशानो वृषभो न युध्मो घना घनः क्षोभण-श्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतग्ं सेना अजयत्-साकमिन्द्रः ॥
संक्रन्द-नेना-निमिषेण जिष्णुना युत्कारेण दुश्च्य-वनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं युधो नर इषु-हस्तेन वृष्णा ॥
स इषु-हस्तैः स निषङ्गि-भिर्वशी सग्ग्स्रष्टा स युध इन्द्रो गणेन ।
सग्ंसृष्टजित् सोमपा बाहुशर्-ध्यूर्ध्वधन्वा प्रति-हिताभि-रस्ता ॥
बृहस्पते परि दीया-रथेन रक्षोहाऽमित्राग्ं अप-बाधमानः ।
प्रभञ्जन्त्-सेनाः प्रमृणो युधा जय-न्नस्माक-मेध्यविता रथानाम् ॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्त-मज्म प्रमृणन्त-मोजसा ।
इमग्ं सजाता अनु वीरयध्व-मिन्द्रग्ं सखायोऽनु सग्ं रभध्वम् ॥
बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभि-सत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥
अभिगो-त्राणि सहसा गाहमानोऽदायो वीर-श्शतमन्युर्-इन्द्रः ।
दुश्च्यवनः पृतना-षाडयुद्ध्यो"ऽस्माकग्ं सेना अवतु प्र युत्सु ॥
इन्द्र आसां नेता बृहस्पतिर्-दक्षिणा यज्ञः पुर एतु सोमः ।

देवसेनाना-मभिभञ्-जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतागं शर्ध उग्रम् ।

महा-मनसां भुवनच्य-वानां घोषो देवानां जयता-मुदस्थात् ॥

अस्माक-मिन्द्रः समृतेषु ध्वजेष्व-स्माकं या इषवस्ता जयन्तु ।

अस्माकं वीरा उत्तरे भवन्त्व-स्मानु देवा अवता हवेषु ॥

उद्धर्षय मघव-न्नायु-धान्युत् सत्वनां माम-कानां महागंसि ।

उद् वृत्रहन् वाजिनां वाजिनान्यु-द्रथानां जयता-मेतु घोषः ॥

उप प्रेत जयता नरः स्थिरा वस्सन्तु बाहवः ।

इन्द्रो वश्शर्म यच्छत्व-नाधृष्या यथाऽसथ ॥

अवसृष्टा परा पत शरव्ये ब्रह्म-सगंशिता ।

गछा-मित्रान् प्रविश मैषां कं चनो-च्छिषः ॥

मर्माणि ते वर्म-भिश्छा-दयामि सोमस्त्वा राजाऽमृतेना-भिऽवस्ताम् - ।

उरोर्-वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः - ॥

यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।

इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥

ॐ नमो भगवते रुद्राय ।

आशु-श्शिशानो -ऽप्रति-रथं

कवचाय हुं ॥

॥ प्रति-पुरुषम् ॥

अथ प्रति-पुरुषानुवाकः ॥

प्रति-पुरुष मेककपाला-न्निर्वपत्ये-कम-तिरिक्तं । यावन्तो गृह्याः समस्तेभ्यः कमकरं । पशूनागं शर्मासि शर्म यजमानस्य । शर्म मे यच्छैक एव रुद्रो न द्वीतीयाय तस्थे । आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्रभागः । सह स्वस्राम्बिकया तं जुषस्व भेषजं । गवेऽश्वाय पुरुषाय भेषजम् । अथो अस्मभ्यं भेषजगं सुभेषजं यथासति । सुगं मेषाय मेष्या अवाम्ब रुद्रमदि-मह्यव देवं । त्र्यम्बकम् । यथा नः श्रेयसः करद्यथा नो वस्य सः करद्यथानः पशु-मतः करद्यथा नो व्यवसा-ययात् । त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम् । उर्वारुकमिव बन्धनान्-मृत्यो-र्-मुक्शीय माऽमृतात् । एषते रुद्र भागस्तं जुषस्व तेना-वसेन परो मूजवतोऽतीह्यव-तत धन्वा पिनाकहस्तः कृत्तिवासाः ॥

प्रति-पुरुष मेककपाला-न्निर्वपति । जाता एवः प्रजा रुद्रा-न्निर-वदयते । एकमति-रिक्तम् । जनिष्यमाणा एव प्रजा रुद्रान्निर-वदयते । एककपाला भवन्ति । एकधैव रुद्रं निरवदयते ।

नाभि-घारयति। यदभि-घारयत्। अन्तरवचारिणग्ं रुद्रं कुर्यात् -। एकोल्मुकेन यन्ति। तद्धि रुद्रस्य भागधेयम्। इमां दिशंयन्ति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदयते। रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्।

न ग्राम्यान् पशून् हिनस्ति। नारण्यान्। चतुष्पथे जुहोति। एष वा अग्नीनां पड्बीशो नाम। अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति। स्रुग्ध्येषा। अथो खलु। अन्तमेनैव होतव्यम्। अन्तत एव रुद्र निर-वदयते। एष ते रुद्र भागः सहस्व-स्राम्बिकये-त्याह। शरद्वा अस्याम्बिका स्वसा। त्या वा एष हिनस्ति। यग्ं हिनस्ति। तयैवैनग्ं सह शमयति। भेषजङ्गव इत्याह। यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजङ्-करोति। अवाम्ब रुद्रम-मदिमही-त्याह। आशिष-मेवै-तामाशास्ते। त्र्यूअबकं यजामह इत्याह। मृत्योर्-मुक्षीय माऽमृतादिति वा वै तदाह। उत्किरन्ति। भगस्य लीप्सन्ते। मूते कृत्वा सजन्ति। यथ जनं यतेऽवसं करोति। तादृगेवतत्। एष ते रुद्र भाग इत्याह निरवत्यै। अप्रतीक्ष-मायन्ति। अपः परिषिञ्चति। रुद्र-स्यान्तर्हित्यै। प्र वा एतेऽस्माल्लो-काच्चयवन्ते। ये त्र्यूअम्बकै-श्चरन्ति आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति॥

विभ्राड्-भृहत्-पिबतु सोम्यं मध्वायुर्-दध-द्यज्ञपता-वविहुतम्। वातजूतो यो अभि-रक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥

ॐ नमो भगवते रुद्राय।
प्रति-पुरुषं प्रति-पुरुषं विभ्राडिति
नेत्र-त्रयाय वौषट् . ॥

॥ त्वमग्ने रुद्रम् (शतरुद्रीयम्) ॥

अथ त्वमग्ने रुद्रानुवाकः ॥

शिवाय नमः ॥

त्वमग्ने रुद्रो असुरो महो दिवः। त्वग्ं शर्धो मारुतं पृक्ष ईशिषे। त्वं वातै-ररुणैर्-यासि शङ्गयः। त्वं पूषा विधतः पासि नु त्मना। देवा देवेषु श्रयद्ध्वम्। प्रथमा द्वितीयेषु श्रयद्ध्वम्। द्वितीया-स्तृतीयेषु श्रयद्ध्वम्। तृतीया-श्चतुर्थेषु श्रयद्ध्वम्। चतुर्थाः पञ्च-मेषु श्रयद्ध्वम्। पञ्चमाः षष्ठेषु श्रयद्ध्वम्। षष्ठाः सप्तमेषु श्रयद्ध्वम्। सप्तमा अष्टमेषु श्रयद्ध्वम्। अष्टमा नवमेषु श्रयद्ध्वम्। नवमा दशमेषु श्रयद्ध्वम्। दशमा एकादशेषु श्रयद्ध्वम्। एकादशा द्वादशेषु श्रयद्ध्वम्।

द्वादशा-स्त्रयोदशेषु श्रयद्ध्वम्। त्रयोदशा-श्चतुर्दशेषु श्रयद्ध्वम्। चतुर्दशा पञ्चदशेषु श्रयद्ध्वम्। पञ्चदशाः षोडशेषु श्रयद्ध्वम्। षोडशाः सप्तदशेषु श्रयद्ध्वम्। सप्तदशा अष्टादशेषु श्रयद्ध्वम्। अष्टादशा एकान्नविंशेषु श्रयद्ध्वम्। एकान्नविंशा विंशे षु श्रयद्ध्वम्। विंशा एकविंशेषु श्रयद्ध्वम्। एकविंशा द्वाविंशेषु श्रयद्ध्वम्। द्वाविंशा-स्त्रयोविंशेषु श्रयद्ध्वम्। त्रयोविंशा-श्चतुर्विंशेषु श्रयद्ध्वम्। चतुर्विंशाः पञ्चविंशेषु श्रयद्ध्वम्। पञ्चविंशा-ष्षड्विंशेषु श्रयद्ध्वम्। षड्विंशाः सप्तविंशेषु श्रयद्ध्वम्। सप्तविंशा अष्टाविंशेषु श्रयद्ध्वम्। अष्टाविंशा एकान्नत्रिंशेषु श्रयद्ध्वम्। एकान्नत्रिंशा-स्त्रिंशेषु श्रयद्ध्वम्। त्रिंशा एकत्रिंशेषु श्रयद्ध्वम्। एकत्रिंशा द्वात्रिंशेषु श्रयद्ध्वम्। द्वात्रिंशा-स्त्रयस्त्रिंशेषु श्रयद्ध्वम्। देवास्त्रिरेकादशा-स्त्रिस्त्रय-स्त्रिंशाः। उत्तरे भवत। उत्तर-वर्त्मान उत्तर-सत्वानः। यत्काम इदं जुहोमि। तन्मे समृद्ध्यताम्। वयग्ग् स्याम पतयो रयीणाम्। भूर्-भुव स्स्व स्स्वाहा॥

ॐ नमो भगवते रुद्राय।

त्वमग्ने त्वमग्ने शत-रुद्रीयम्-इत्

यस्त्राय फट्.।

भूर्-भुव-स्सुवरों इति दिग्बन्धः॥

॥ पञ्चाङ्ग जपः॥

अथ पञ्चाङ्गं सकृज्जपेत् ॥

शिवाय नमः ॥

सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः । भवे भवे नाति भवे भवस्वमां ।
भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमश्-श्रेष्ठाय नमो रुद्राय नमः । कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस् ।
सर्वभूतदमनय नमो मनोन्मनाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभः ।
सर्वेभ्यस्-सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

तत्-पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम् ।

ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम्॥

॥ अष्टाङ्ग प्रणामम् (नमस्कारः) ॥

अथ साष्टाङ्ग प्रणामः॥

शैवाय नमः॥

हिरण्यगर्भः समवर्त-ताग्रे भूतस्य जातः पतिर् एक आसीत् -।
स दाधार पृथ्इवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
उरसे नमः। उमा-महेश्वराभ्यां नमः॥

यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव।
य ईशे अस्य द्विपदश् चतुष्पदः कस्मै देवाय हविषा विधेम॥
शिरसे नमः। उमा-महेश्वराभ्यां नमः॥

ब्रह्म-जज्ञानं प्रथमं पुरस्ता-द्विसी-मत-स्सुरुचो वेन आवः। सबुध्निया उपमा
अस्य विष्ठा-स्सतश्च योनि-मसतश्च विवः॥
दृष्ट्यै नमः। उमा-महेश्वराभ्यां नमः॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥
मनसे नमः । उमा-महेश्वराभ्यां नमः ॥

उप श्वासय पृथिवीम् उत द्याम् पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूर्-इन्द्रेण देवैर्-दूरा-द्दवीयो अप सेध शत्रून् ॥
वचसे नमः । उमा-महेश्वराभ्यां नमः ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् - ।
युयोध्यास्म ज्जुहुरा-णमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥
पद्भ्यां नमः । उमा-महेश्वराभ्यां नमः ॥

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया
रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीग्ग्
स्वाहा ॥
कराभ्यां नमः । उमा-महेश्वराभ्यां नमः ॥

इमं यम-प्रस्तर-माहि सीदाऽङ्गि-रोभिः पितृभि-स्संविदानः ।

आत्वा मन्त्राः कविशस्ता वहन्-त्वेना राजन् हविषा मादयस्व ॥

कर्णाभ्यां नमः । उमा-महेश्वराभ्यां नमः ॥

उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।

पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोष्टाङ्ग उच्यते ॥

॥ लघु न्यासः ॥

ॐ अथात्मानं शिवात्मानग्ग् श्रीरुद्ररूपं ध्यायेत् ॥

शुद्ध-स्फटिक-सङ्काशं त्रिनेत्रं पञ्च-वक्त्रकम् ।

गङ्गाधरं दशभुजं सर्वभरण-भूषितम् ॥

नीलाग्रीवं शशाङ्काङ्कं नाग-यज्ञो-पवीतिनम् ।

व्याघ्र-चर्मोत्तरीयं च वरेण्यम्-अभयम्-प्रदम् ॥

कमण्डलु्-वक्ष-सूत्राणां धारिणं शूलपाणिनम् ।

ज्वलन्तं पिङ्गलाजटा-शिखामुद्योत-धारिणम् ॥

वृषस्कन्ध-समारूढं उमादेहार्ध धारिणम् ।

अमृतेना-प्लुतं शान्तं दिव्यभोग-समन्वितम् ॥

दिग्देवता-समायुक्तं सुरासुर-नमस्कृतम् ।

नित्यं च शाश्वतं शुद्धं ध्रुवम्-अक्षरम्-अव्ययम् ॥

सर्व-व्यापिनम्-ईशानं रुद्रं वै विश्वरूपिणम् ।

एवं ध्यात्वा द्विज स्स्म्यक् ततो यजन-मारभेत् ॥

अथातो रुद्र-स्नान्-आर्चन्-आभिषेक-विधिं व्या᳚ख्यास्याम॒ः ।

आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो

ब्रह्मचारी शुक्लवासा देवाभिमुखः

स्थित्वा आत्मनि देवताः स्थापयेत् ॥

प्रजनने ब्रह्मा तिष्ठतु ।

पादयोर्-विश्णु स्तिष्ठतु ।

हस्तयोर्-हर स्तिष्ठतु ।

बाह्वोर्-इन्द्र स्तिष्ठतु ।

जठरेऽग्नि स्तिष्ठतु ।

हृदये शिव स्तिष्ठतु ।

कन्ठे वसव स्तिष्ठन्तु ।

वक्त्रे सरस्वती तिश्ठतु ।

नासिकयोर्-वायु स्तिष्ठतु ।

नयनयोश्-चन्द्रादित्यौ तिष्ठेताम् ।

कर्णयोर्-अश्विनौ तिष्ठेताम्।

ललाटे रुद्रा स्तिष्ठन्तु।

मूर्ध्न्यादित्या स्तिष्ठन्तु।

शिरसि महादेव स्तिष्ठतु।

शिखायाम् वामदेव स्तिष्ठतु।

पृष्ठे पिनाकी तिष्ठतु।

पुरतः शूली तिष्ठतु।

पार्श्वयोः शिवा-शन्करौ तिष्ठेताम्।

सर्वतो वायु स्तिष्ठतु।

ततो बहिः सर्वतोऽग्निर्-ज्वाला-माला परिवृत स्तिष्ठतु।

सर्वे-ष्वङ्गेषु सर्वा देवता यथा-स्थानं तिष्ठन्तु।

मागं रक्षन्तु॥

अग्निर्मे वाचि श्रितः वाग्धृदये। हृईदयं मयि। अहममृते। अमृतं ब्रह्मणि।

वायुर्मे प्राणे श्रितः। प्राणो हृदये ई हृईदयं मयि। अहममृते। अमृतं ब्रह्मणि।

सूर्यो मे चक्षुषि श्रितः। चक्षुर्-हृदये। हृईदयं मयि। अहममृते। अमृतं ब्रह्मणि।

चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

दिशो मे श्रोत्रे श्रिताः -। श्रोत्रगं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आपो मे रेतसि श्रिताः -। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पृथिवी मे शरीरे श्रिताः -। शरीरग्ं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ओषधि-वनस्पतयो मे लोमसु श्रिताः -। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

इन्द्रो मे बले श्रितः। बलग्ं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ईशानो मे मन्यौ श्रितः। मन्युर्-हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पुनर्म आत्मा पुनरायु-रागात्।
पुनः प्राणः पुनराकू-तमागात् ई
वैश्वानरो रश्मिभिर्-वावृधानः ई
अन्त-स्तिष्ठ-त्वमृतस्य गोपाः -॥

एवं यथा-लिङ्ग-मङ्गानी संमृज्या देवमात्मानं च प्रत्या राधयेत्॥

अथ आत्म पूजा॥

शिवाय नमः ॥

आराधितो मनुष्यैस्त्वं सिद्धैर्-देवासुरादिभिः ।
आराधयामि भक्त्या त्वां मानुगृहाणं महेश्वर ॥
हर हर नमः पार्वती पतये - हर हर महादेव ॥

॥ ध्यान श्लोकम् ॥

ॐ ध्याये-न्निरामयं वस्तु सर्गस्थिति-लयादिकम् ।
निर्गुणं निष्कलं नित्यं मनो-वाचा-मगोचरम् ॥
गङ्गाधरं शशिधरं जटामकुट-शोभितम् ।
श्वेतभूति-त्रिपुण्ड्रेण विराजित ललाटकम् ॥
लोचन-त्रय-संपन्नं स्वर्ण-कुण्डल-शोभितम् ।
स्मेरा-ननं चतुर्बाहुं मुक्ता-हारो-पशोभितम् ॥
अक्षमालां सुधाकुम्भं चिन्मयीं मुद्रिकामपि ।
पुस्तकं च भुजैर्-दिव्यैर्-दधानं पार्वती-पतिम् ॥
श्वेताम्बर-धरं श्वेतं रत्न-सिंहासन-स्थितम् ।
सर्वाभीष्ट-प्रदातारं वटमूल-निवासिनम् ॥
जपा-कुसुम-सहस्र-समान-श्रिय-मीश्वरीम् ।

सुवर्ण-रत्न-खचित-मकुटेन विराजिताम्॥

ललाट-पट्ट-संराजत्-संलग्न-तिलकाञ्चितम्।

राजीवायत-नेत्रान्तां नीलोत्-पलद्-लेक्षणाम्॥

सन्तप्त-हेम-खचित-ताटङ्का-भरणान्-वितम्।

ताबुला-चर्वण-रत-रक्तजिह्वा-विराजिताम्॥

पताका-भरणो-पेतं मुक्ता-हारो-पशोभिताम्।

स्वर्ण-कङ्कण-संयुक्तै-चतुर्भिर्-बाहुभिर्-युताम्।

सुवर्ण रत्न-खचित-काञ्ची-दाम-विराजिताम्।

कदली-ललीत-स्तम्भ-सन्नि-भोरु-युगान्विताम्॥

श्रिया विराजित-पदां भक्तत्राण-परायणाम्।

अन्योन्या-श्लिष्टहृद्-बाहु-गौरीशङ्कर-संज्ञकम्॥

सनातनं परं ब्रह्म परमात्मान-मव्ययम्।

आवाहयामि जगता-मीश्वरं परमेश्वरम्॥

आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः।

वाताजितैर्-बलवद्भिर्-मनोजवैः -। रायाहि शीघ्रं। मम हव्याय शर्वोम्।

ईशान-मावाहयामीत्यावाह्य॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम्।
उर्वारुकमिव बन्धनान्-मृत्यो-र्-मुक्शीय माऽमृतात्॥
गौरी मिमाय सलिलानि तक्श-त्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी
बभूवुषी सहस्राक्शरा परमे व्योमन्॥

॥ रुद्र विनियोग नास्य ध्यानम् च ॥

॥ विनियोगः ॥

ॐ अस्य श्री रुध्रा-ध्याय-प्रश्न-महा-मन्त्रस्य। अघोर ऋषिः।
अनुष्टुप्-छन्दः। सङ्कर्षण-मूर्ति-स्वरूपो योऽसा-वादित्यः परम-पुरुषः स एष
रुद्रो देवता। नमः शिवा-येति बीजम्। शिवतरा-येति शक्तिः। महादेवा-येति
कीलकम्। श्री-साम्ब-सदाशिव-प्रसाद-सिद्ध्यर्थे। श्रीरुद्र जपे विनियोगः॥

॥ नास्य ॥

अग्नि-होत्रात्-मने अङ्गुष्-ठाभ्यां नमः।

दर्श-पूर्ण-मासात्-मने तर्ज-नीभ्यां नमः।

चातुर्-मास्-यात्मने मध्य-माभ्यां नमः।

निरूढ-पशु-बन्धात्-मने अनामि-काभ्यां नमः।

ज्योतिष्तो-मात्मने कनिष्ठि-काभ्यां नमः।

सर्व-क्रत्वात्-मने कर-तल-कर-पृष्ठाभ्यां नमः।

अग्नि-होत्रात्-मने हृदयाय नमः।

दर्श-पूर्ण-मासात्-मने शिरसे स्वाहा।

चातुर्-मास्-यात्मने शिखायै वषट्।

निरूढ-पशु-बन्धात्-मने कवचाय हुं।

ज्योतिष्ठो-मात्मने नेत्र-त्रयाय वौषट्।

सर्व-क्रत्वात्-मने अस्त्राय फट्।

भूर्-भुवस्-सुवरों-इति दिग्बन्धः॥

॥ ध्यानम्॥

आपाताल-नभः स्थलान्त-भुवन-ब्रह्माण्ड-मावि-स्फुरत्-

ज्ज्योतिः स्फाटिक-लिङ्ग-मौलि-विलसत् पूर्णेन्-दु-वान्ता-मृतैः। अस्तोका-

प्लुतमेक-मीश-मनिशं रुद्रानु-वाका-ञ्जपन्

ध्याये-दीप्सित सिद्धयेऽ-द्रुतपदं विप्रोऽभि-षिञ्चेच्-छिवम् ॥

ब्रह्माण्ड-व्याप्त-देहा भसित-हिमरुचा भास-माना भु-जङ्गैः

कण्ठे कालाः कपर्दा-कलित शशि-कलाश्-चण्ड-कोदण्ड-हस्ताः।

त्र्यक्शा रुद्राक्श-मालाः प्रणत-भय-हराः शांभवा मूर्ति-भेदाः

रुद्राः श्री-रुद्रसूक्त-प्रकटित-विभ-वा नः प्रयच्-छन्तु सौख्यम्॥

॥ गणपति प्रर्थानम् ॥

ॐ गणानाम् त्वा गणपतिं हवामहे कविं कवीनाम्-उपमश्र-वस्तमम् ।
ज्येष्ठ-राजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्-नूथिभि-स्सीध सादनम् ।
ॐ श्री महा-गणपतये नमः ॥

॥ शान्ति पाठम् ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे
श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे
क्शेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे
प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्श्मं च मेऽनामयच्च
मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च
मे सूषा च मे सुदिनं च मे ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

॥ रुद्र नमकम् ॥

ॐ नमो भगवते रुद्राय ॥

आं नं ॥

नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

या त इषुः शिवतमा शिवम् बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ता-भिचाकशीहि ॥

यामिषुं गिरिशंत हस्ते बिभर्-ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत् ॥

शिवेन वचसा त्वा गिरिशा-च्छावदामसि ।
यथा नः सर्वमि-ज्जगदय-क्ष्मग्ं सुमना असत् ॥

अध्यवो-चदधि-वक्ता प्रथमो दैव्यो भिषक् ।
अहीग्ंश्च सर्वाञ्-जम्भयन्त्-सर्वाश्च यातुधान्यः ॥

असौ यस्तम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाग्ं हेड ईमहे ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश-न्नदृश-न्नुदहार्यः ॥

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
नमो अस्तु नीलग्री-वाय सहस्रा-क्षाय मीढुषे ॥

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ।
प्रमुञ्च धन्वन-स्त्व-मुभयो-रार्त्नियोर्ज्याम् ॥

याश्च ते हस्त इषवः परा ता भगवो वप ।
अवतत्य धनुस्त्वग्ं सहस्राक्श शतेषुधे ॥

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत ॥

अनेश-न्नस्येषव आभुरस्य निषङ्गथिः ।

या ते हेतिर्मी-ढुष्टम हस्ते बभूव ते धनुः ॥

तयाऽस्मान् विश्वत-स्त्वमय-क्ष्मया परिब्भुज ।
नमस्ते अस्त्वायु-धायाना-तताय धृष्णवे ॥

उभाभ्या-मुत ते नमो बाहुभ्याम् तव धन्वने ।
परि ते धन्वनो हेतिरस्मान्-वृणक्तु विश्वतः ॥

अथो य इषुधि-स्तवारे अस्मन्निधेहि तम् ।

शम्भवे नमः ॥

नमस्ते अस्तु भगवन्-विश्वेश्वराय महा-देवाय त्र्यम्-बकाय त्रिपुरान्-तकाय
त्रिकाग्नि-कालाय कालाग्नि-रुद्राय नील-कण्ठाय मृत्युङ्-जयाय सर्वे-श्वराय
सदा-शिवाय श्रीमन्-महा-देवाय नमः ॥१ ॥

नमो हिरण्य-बाहवे सेनान्ये दिशां च पतये नमो नमो वृक्शेभ्यो हरिकेशेभ्यः
पशूनां पतये नमो नमः सस्पिञ्-जराय त्विषीमते पथीनां पतये नमो नमो
बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेश्यो-पवीतिने पुष्टाणं पतये नमो

नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्राया-तताविने क्शेत्राणां पतये नमो
नमः सूताया-हन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्शाणं पतये
नमो नमो मन्त्रिणे वाणिजाय कक्षाणं पतये नमो नमो भुवंतये वारिवस्-कृधायौ-
षधीनां पतये नमो नम उच्चैर्-घोषाया-क्रन्दयते पत्तीनाम् पतये नमो नमः
कृत्स्नवीताय धावते सत्वनां पतये नमः ॥२॥

नमः सहमानाय निव्यादिन आव्या-धिनीनां पतये नमो नमः ककुभाय निषङ्गिणे
स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते
परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचराया-रण्यानां पतये नमो नमः
सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं-चरद्भ्यः
प्रकृन्तानां पतये नमो नम उष्णीषिने गिरिचराय कुलुञ्चानां पतये नमो नम
इषुमद्भ्यो धन्वावि-भ्यश्च वो नमो नम आतन्वानेभ्य प्रतिदधाने-भ्यश्च वो नमो
नम आयच्छद्भ्यो विसृजद्-भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्-भ्यश्च वो नमो
नम आसीनेभ्यः शयाने-भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्-भ्यश्च वो नमो
नम-स्तिष्ठद्भ्यो धावद्-भ्यश्च वो नमो नमः सभाभ्यः सभापति-भ्यश्च वो नमो
नमो अश्वेभ्योऽश्वपति-भ्यश्च वो नमः ॥३॥

नम आव्यधिनीभ्यो विविध्यन्ती-भ्यश्च वो नमो नम उगणाभ्य-स्तृग्ंहतीभ्यश्च वो
नमो नमो गृत्सेभ्यो गृत्सपति-भ्यश्च वो नमो नमो व्रातेभ्यो व्रातपति-भ्यश्च वो

नमो नमो गणेभ्यो गणपति-भ्यश्च वो नमो नमो विरूपेभ्यो विश्वरुपे-भ्यश्च वो नमो नमो महद्भ्यः. क्शुल्लके-भ्यश्च वो नमो नमो रथिभ्योऽर्थेभ्यश्च वो नमो नमो रथेभ्यो रथपति-भ्यश्च वो नमो नमः सेनाभ्यः सेननि-भ्यश्च वो नमो नमः. क्शत्तृभ्यः संग्रहीतृ-भ्यश्च वो नमो नमस्तक्शभ्यो रथकारे-भ्यश्च वो नमो नमः कुलालेभ्यः कमारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादे-भ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्-भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपति-भ्यश्च वो नमः ॥४ ॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्शाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृद्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥५ ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्शेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्श्याय च नमः श्रवाय च प्रतिश्रवाय च नम

आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च
नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय
च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च
सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय
च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो
वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च
नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ७ ॥

हर हर

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च
नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च
नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शंकराय
च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः
पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च
नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नम इरिण्याय च प्रपथ्याय च नमः किंशिलाय च क्शयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पांसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विक्शीणकेभ्यो नमो विचिन्-वत्केभ्यो नम आनिर्-हतेभ्यो नम आमी-वत्केभ्यः ॥ ९॥

द्रापे अन्धसस्पते दरिद्र-न्नीललोहित।
एषां पुरुषाणा-मेषां पशूनां मा भेर्माऽरो मो एषां किंचना-ममत्.॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥

इमां रुद्राय तवसे कपर्दिने क्शयद्वीराय प्रभरामहे मतिम्।
यथा नः शमसद्-द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥

मृडा नो रुद्रोत नो मयस्कृधि क्शय-द्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥

मा नो महान्त-मुत मा नो अर्भकं मा न उक्शन्त-मुत मा न उक्शितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते ॥

आरात्ते गोघ्न उत पूरुषघ्ने क्शय-द्वीराय सुम्नमस्मे ते अस्तु ।
रक्शा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-मुपहत्नु-मुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्नि-वपन्तु सेनाः ॥

परिणो रुद्रस्य हेतिर्-वृणक्तु परि त्वेषस्य दुर्मतिर-घायोः - ।
अव स्थिरा मघवद्-भ्यस्तनुष्व मीढ्व-स्तोकाय तनयाय मृडय ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्श आयुध-न्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदा-गहि ॥

विकिरिद विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रगं हेतयोन्-यमस्मन्नि-वपन्तु ताः - ॥

सहस्राणि सहस्रधा बाहुवो-स्तव हेतयः ।
तासा-मीशानो भगवः पराचीना मुखा कृधि ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषागं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

अस्मिन् महत्यर्णवेऽन्तरिक्शे भवा अधि ॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्शमाचराः - ॥
नीलग्रीवाः शितिकण्ठा दिवगं रुद्रा उपश्रिताः - ॥
ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः - ॥
ये भूताना-मधिपतयो विशिखासः कपर्दिनः ॥
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥
ये पथां पथि-रक्शय ऐलबृदा यव्युधः ॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥
य एतावन्तश्च भूयागंसश्च दिशो रुद्रा वितस्थिरे ।
तेषागं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्शे ये दिवि येषामन्नं वातो वर्ष-मिषव-स्तेभ्यो
दश प्राचीर्दश दक्शिणा दश प्रतीचीर्-दशोदीचीर्-दशोर्ध्वा-स्तेभ्यो नमस्ते नो
मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥११ ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम् ।
उर्वारुकमिव बन्धनान्-मृत्यो-र्-मुक्शीय माऽमृतात् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय
नमो अस्तु ॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्शयति भेषजस्य ।
यक्श्वामहे सौमनसाय रुद्रं नभोभिर्-देवम्-असुरं दुवस्य ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवा-भिमर्शनः ॥

ये ते सहस्र-मयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान् यज्ञस्य मायया सर्वानव यजामहे ॥

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥

ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ।
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।
तेना-न्नेनाप्यायस्व ॥
नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥
सदाशिवोम् ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

॥ चमकप्रश्नः ॥

अग्ना-विष्णू सजोषसे-मा वर्धन्तु वां गिरः ।
द्युम्नैर्-वाजेभिरागतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्शुश्च मे श्रोत्रं च मे दक्शश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च

मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३ ॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे

पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च
मेऽक्शितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्शुच्च मे व्रीहियश्च मे यवाश्च मे माषाश्च मे
तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे
श्यामकाश्च मे नीवाराश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे
हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म
आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्च्यं च मेऽकृष्टपच्च्यं च मे ग्राम्याश्च मे
पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु
च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥
५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म
इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे
वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म
इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे
पृथिवी च म इन्द्रश्च मेऽन्तरिक्शं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म
इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥

अंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपांशुश्च मेऽन्तर्यामश्च म ऐन्द्र-वायवश्च मे मैत्रा-वरुणश्च म आश्विनश्च मे प्रति-प्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोण-कलशश्च मे वायव्यानि च मे पूतभृच्च म आध-वनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्क्वरीरङ्-गुलयो दिशश्च मे यज्ञेन कल्पन्ताम्-ऋक्क मे साम च मे स्तोमश्च मे यजुश्च मे दीक्शा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृह-द्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ९ ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्शा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च

मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्-अपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्शुर्-यज्ञेन कल्पताग्ग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पताम्-आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविंग्-शतिश्च मे त्रयोविंग्-शतिश्च मे पञ्चविंग्-शतिश्च मे सप्तविंग्-शतिश्च मे नवविंग्-शतिश्च म एकत्रिंग्-शच्च मे त्रयस्त्रिंग्-शच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंग्-शतिश्च मे चतुर्विंग्-शतिश्च मेऽष्टाविंग्-शतिश्च मे द्वात्रिंग्-शच्च मे षट्त्रिंग्-शच्च मे चत्वरिंग्-शच्च मे चतुश्-चत्वारिंग्-शच्च मेऽष्टाचत्वारिंग्-शच्च मे वाजश्च प्रसवश्चा-पिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्-चान्त्यायनश्-चान्त्यश्च भौवनश्च भुवनश्चा-धिपतिश्च ॥ ११ ॥

ॐ इडा देवहूर्-मनुर्यज्ञनीर्-बृहस्पतिरुक्था-मदानि शंग्सिष-द्विश्वेदेवाः सूक्त-वाचः पृथिवी-मातर्मा मा हिंग्सीर्-मधु मनिष्ये मधु जनिष्ये मधु वक्श्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासंग् शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥